# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

**कक्षा**–शास्त्री-2(SEM-4) **प्रश्नपत्रम्** - ७ **गुणाः** - ७०

**विषयः** - पौरोहित्यम् **कोड- CE- 244** **समयः** - ३ तः ६

**दिनाङ्कः** - ०५/०४/२०१९ **सन्दर्भग्रन्थः**- दुर्गासप्तशत्याः प्रथमाध्यायादारभ्य पञ्चमाध्यायं यावत्।

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥

२ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः। ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्॥

३ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम्। अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा॥

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ यथाशास्त्रं मधुकैटभौ दृष्ट्वा ब्रह्मणः स्तुतिं विवृणुत।

२ द्वितीयाध्यायात् कांश्चन पञ्चश्लोकान् विलिख्य तेषामर्थं कुरुत।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः। तया महासिना देव्या शिरश्छित्त्वा निपातितः॥

२ भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते। यदयं निहतः शत्रुरस्माकं महिषासुरः॥

३ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्। प्रहर्षं च परं जग्मुः सकला देवतागणाः॥

**प्रश्नः ४ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ दुर्गासप्तशत्याः तृतीयाध्यायस्य विषयवस्तु प्रस्तूयताम्।

२ शक्रादिभिः सुरगणैः कृता स्तुतिः ग्रन्थानुसारं विवेचनीया।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ एवं स्तवादियुक्तानां देवानां तत्र पार्वती। स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन॥

२ एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान्। किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा॥

३ स्त्रीरत्नभूतां त्वां देवि! लोके मन्यामहे वयम्। सात्वमस्मानुपागच्छ यतो रत्नभुजो वयम्॥

**प्रश्नः ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ मार्कण्डेयपुराणे श्रीदुर्गासप्तशत्याः स्थानं महत्त्वं च दर्शयत।

२ श्रीदुर्गासप्तशत्याः पञ्चमाध्याये देवाः केन प्रकारेण देवीं स्तुवन्ति? वर्णयत।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ प्रथमचरित्रे कस्याः देव्याः स्तुतिर्वर्तते?

२ 'श्रीदुर्गासप्तशती' कस्मिन् पुराणे वर्तते?

३ समाधिनामकस्य धनिकस्योत्पत्तिः कस्मिन् कुले जाता?

४ मध्यमचरित्रस्य तत्त्वं किमस्ति?

५ प्रथमचरित्रे का शक्तिः?

६ मध्यमचरित्रस्य ऋषिः कः?

७ मध्यमचरित्रस्य ध्यानं किमस्ति?

८ भगवत्याः कृते खड्गं कः दत्तवान्?

९ उत्तरचरित्रस्य का देवता?

१० सिद्धकुञ्जिकास्तोत्रं कस्मिन् तन्त्रे वर्णितमस्ति?

११ देव्याः कवचानुसारं काः सन्ति नवदुर्गाः?

१२ तन्त्रोक्तं रात्रिसूक्तं कस्मिन् अध्याये विद्यते?

१३ महिषासुरवधप्रसङ्गः कस्मिन् अध्याये दृश्यते?

१४ प्रथमाध्यायस्य मङ्गलाचरणश्लोकं लिखत ।

१५ ऋग्वेदः कस्य चरित्रस्य स्वरूपम्?

०००